॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
110

महाकवि-श्रीभारविप्रणीतम्

# किरातार्जुनीयम्

महामहोपाध्यायकोलाचलमल्लिनाथसूरिकृतया
'घण्टापथ'-व्याख्यया समुल्लसितम्
तथैव च
हिन्दीव्याख्यासमन्वितम्

व्याख्याकारः-
श्रीबदरीनारायणमिश्रः

चौखम्बा सुरभारती प्रकाशन
वाराणसी

THE
CHAUKHAMBA SURBHARTI GRANTHAMALA
110

# KIRATĀRJUNĪYAM

*of*

## SRI BHĀRAVI

*with*

**'GHAṆṬĀPATHA' Sanskrit Commentary**

*by*

**M. M. Mallināthasūri**

Hindi Commentary
*by*
**Shri Badarinarayana Mishra**

CHAUKHAMBA SURBHARTI PRAKASHAN
VARANASI

॥ श्रीः ॥

महाकविभारविप्रणीतं

# किरातार्जुनीयम्

## प्रथमः सर्गः

### 'घण्टापथ'-कर्तुर्मङ्गलाचरणम्

अर्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत् ।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रकाशात्प्रलीयन्ते मोहान्धतमसश्छटाः ॥
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी-
मन्तस्तत्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥
नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥
नानानिबन्धविषमैकपदैर्नितान्तं साशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ।
कर्तुं प्रवेशमिह भारविकाव्यबन्धे घण्टापथं कमपि नूतनमातनिष्ये ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान्भारविनामा कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनताम्, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति—

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

**अन्वयः**—कुरूणाम् अधिपस्य श्रियः पालिनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी स वनेचरः विदितः सन् द्वैतवने युधिष्ठिरं समाययौ।

**श्रिय इति** ॥ आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नात्रातीवोपयुज्यते। तदुक्तम्—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति। कुरूणां निवासाः कुरवो जनपदाः। 'तस्य निवासः' इत्यण्प्रत्ययः। जनपदे लुप्। तेषामधिपस्य दुर्योधनस्य सम्बन्धिनीम्। शेषे षष्ठी। श्रियो राजलक्ष्म्याः। 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। पाल्यतेऽनयेति पालनी ताम्। प्रतिष्ठापिकामित्यर्थः। प्रजारागमूलत्वात्सम्पद इति भावः। 'करणाधिकरणयोश्च' इति करणे ल्युट्। 'टिड्ढाणञ्–' इत्यादिना ङीप्। प्रजासु जनेषु विषये। 'प्रजा स्यात्सन्ततौ जने' इत्यमरः। वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्—'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।' एतदष्टविधमैथुनाभावः प्रशस्तिः। 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः। तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी। ब्रह्मचारिवेषवानित्यर्थः। स नियुक्तः। वने चरतीति वनेचरः किरातः। 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः। 'चरेष्टः' इति टप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। विदितं वेदनमस्यास्तीति विदितः परवृत्तान्तज्ञानवानित्यर्थः। 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः। अथवा कर्तरि कर्मधर्मोपचाराद्विदितवृत्तान्तो विदित इत्युच्यते। उभयत्रापि 'पीता गावः', 'भुक्ता ब्राह्मणाः', 'विभक्ताः भ्रातरः' इत्यादिवत्साधुत्वम्। न तु कर्तरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः—'अकारो मत्व-